PURCHASED

# LITERARY GEMS
## FROM
# SANSKRIT LITERATURE

(A STUDY OF RARE MANUSCRIPTS)

*By*

**Dr. Siddharth Yeshwant Wakankar**

Deputy Director,

Oriental Institute, M.S.U., Baroda.

BKP

BHARATIYA KALA PRAKASHAN

DELHI (INDIA)

23 CM.

Scanned with CamScanner

# AVYAYĀRṆAVA OF JAYABHAṬṬĀRAKA – A RARE LEXICON

The *Avyayārṇavava* of Jayabhaṭṭāraka is a lexicon dealing with the homonymous indeclinables, as is clearly mentioned by the author in the third verse.[1] This lexicon is divided into three chapters,. termed as the *taraṅgas*. The author openly admits in the thrid verse that the *Śubdārṇaya* (also known as the *Siddhaśabdārṇava,* composed by Sahajakīrti, a Jain scholar of the 17th century, is the sources of this lexicon. This lexicon consists of 124 *Anuṣṭubh ślokas,* with the following break-up : 74 verses in the first *taraṅga;* 31 verses in the second *taraṅga* and 19 verses in the third and the last *tarnga*. The author says that the purpose of his composing this lexicon is to clearly explain the *Nānārthaka Avyayas* (verse 3.) With just this very brief introduction, the author starts the treatment of the *Avyayas* from the fourth verse itself.

## The Author :

The very first verse[2] informs us that the author Jayabhaṭṭāraka is an ardent devotee of the Lord Maheśvara. The colophon[3] throws much light on the erudition of our author.

---

१. शब्दार्णवान्तरासक्ता येऽव्यया: स्युर्मनोहरा:।
नानार्थकास्तानैवाद्य कुर्वेऽत्र बहु विस्फुटम् ॥३॥

२. महेश्वरपदाम्भोजविलसद्भृङ्गमानस:
जयभट्टारक: श्रीमान् स करोत्यव्ययार्णवम् ॥१॥

३. इति श्रीमत्समस्तशब्दान्तरङ्गविद्विचित्रभाषानाथभूषणभूपालाखिलसंसेव्यमानपादारविन्द-जगद्विजयप्रभावविराजितजयभट्टकविराजविरचितेऽव्ययार्णवे तृतीयस्तरङ्ग: समाप्त:॥

lary; he is a polyglot. He is one of the best poets and has the distinctive credit of possessing the prowess to conquer the world (of scholars). One of his adjectives, viz. *kavirāja*, may be taken to mean : (1) Best amongst the poet—*kavīnām kaviṣu vā rājā* or (2) Poet-King—*kaviḥ ca asau rājā ca*. In the absence of any further decisive information, pertaining to the biographical account of the author, it is very difficult to have or to draw a clear picture of the personality of our author.

**Mss. Material :**

The *New Catalogus Catalogorum,* Vol. I Revised Edition, p. no. 431, supplies the following information regarding the two places where the manuscripts of this rare work are deposited : (1) The Government Oriental Manuscripts Library, Madras. It has two mss. bearing nos. D. 1596 and D. 1597. Both are in the Telugu script. My friend from Madras, Prof., Dr. V.L. Sethuraman, kindly supplied me a Devanāgarī transcript of these two Telugu mss. with the kind assistance of Pandit S.N. Bhaskar and the Curator of the Govt. Oriental Mss. Library, Madras & promptly sent it to me. I sincerely acknowledge their debt and thank them for their courtesy. Prof. Sethuraman also informs me, after collating both the mss. with the help of Pt. Bhaskarji, that there is no difference at all between these two mss. Dr. Sethuraman further opines that D. 1596 is a *verbatim* copy of D. 1597.

(2) William Taylor mentions on p. 128 and p. 374 of his *Catalogue Rasonne of Oriental Manuscripts* in the Govt. Libarary, Vol. II, Madras, 1860 as follows :

(I) p. 128-26. No. 850 Seven lexicons or dictionaries.

(1) *Avyaya arnava-slocas.*

By Jayā bhaṭṭaraca—3 *tarangas,* or "waves of the sea of words". Complete. It contains indeclinable words.

(II) 374-9 No. 612. Fourteen sections.

(1) *Avyaya arnavam,* slocas.

By Bhaṭṭa cavi.

1-3 *tarangas,* that is three "waves in the sea of indeclinables". A list of particles with their meanings

No further information such as the beginning, end, colophon, date, script, number of folios etc. is furnished by Taylor, neither is it mentioned whether the mss. are written on paper or palm-leaves.

**Language :**

The most striking feature of the language of this lexicon is that the worl *Avyaya* is used in masculine gender[1] as against the normally accepted tradition of the Sanskrit Grammarians. The treatment is very simple and the language poses no problems. As it is not an original work, the meanings given are also well-known requiring no comments from scholars. At least five words[2], viz Cakkaḍāram (verse 118) Uñcavālam (v. 122), Gaḍakhaṭṭam (v. 123), Śatabāḍam (v. 124) and Iḷḷā (v. 10) suggest that the author rightly claims to have a knowledge of many languages (or dialects), since, these words are not purely Sanskrit. This shows that the author must have been influenced by the local dialects or his own dialects-language-when he used these words. These words are from South Indian languages, of which the present writer is innocent. The scholars are requested to enlighten me on these.

---

१. See verse no. 3 above in f.n. no. 1 and
एवमन्ये तत्र-तत्र प्रसिद्धा अपि केचन।
ऊह्यास्तरङ्गभावार्थमेवं प्रोक्तं मयाऽधुना ॥४७॥

२. I. ईहस्संरोधसौभाग्यवैरवैचित्र्यवाचकः।
इह्लाभिप्रायसर्वज्ञबोधकारकभाजने ॥१०॥

II. चक्कडारं महासत्त्वे सौख्ये साध्ये च भूषणे।
मालिन्ये च मनोज्ञे च विहाररणयोरपि ॥११८॥

III. उञ्चवालं विशरणे पारिजाते च पादपे।
मत्स्याक्ष्यां मौसले चित्ते चाृति क्वचित्स्मृतम् ॥१२२॥

IV. गडखट्टं विलोके स्यात् सान्तत्ये संवृतावपि।
गामानयेति संज्ञानां गाने गङ्गासरिज्जले ॥१२३॥

V. शातबाडंतु शाकुन्ते चातुर्ये शाङ्क्रये़ऽप्यहौ।
बाचालेऽपि च वाचाटे कुत्सिते पापचिन्तके ॥१२४॥

Scanned with CamScanner

**DATE :** The fact that this lexicon clearly mentions the *Śabdārṇava* or the *Siddha-śabdārṇava* (of Sahajakīrti), shows that is must have been composed in the latter half of the 17th century or afterwards. Dr. M.M. Patkar, in his excellent Thesis, *"History of Sanskrit Lexicography"*, says on p. 139 : "We may, therefore, assign the period about A.D. 1630 to his (i.e. Sahajakīrti's) lexicon and other works". No further concrete observation can be made in the absence, rather unavailability, of other solid proofs. I close this short note with a sincere request to the scholars to kindly enlighten me on this point.

॥ श्रीः॥

## ॥ अव्ययार्णवः॥

महेश्वरपदाम्भोजविलसद्भृङ्गमानसः।
**जयभट्टारकः** श्रीमान् स करोत्यव्ययार्णवम्॥१॥
ये त्वव्ययपरीक्षार्थमनोवृत्तिविचित्रिताः।
एतत्परीक्षकास्ते स्युस्तरङ्गत्रयसंमितम्॥२॥
**शब्दार्णवा**न्तरासक्ता येऽव्ययाः स्युर्मनोहराः।
नानार्थकास्तानेवाद्य कुर्वेऽत्र बहुविस्फुटम्॥३॥
अरं त्वग्रे च धारायां शिखायां मण्डलेऽपि च।
आरं परसमूहे स्यात्परमार्थस्वरूपयोः॥४॥
अद्यानन्दमनोभावविकाराकारवस्तुषु।
प्रस्तुताधारपर्यायपराकाष्ठाशरीरिषु॥५॥
अथानुवाकाद्यारम्भप्रश्नकात्स्न्र्यावधारणे।
अहो विकार आश्चर्ये विस्मये परमाद्भुते॥६॥
अथोऽप्यधिवरश्रेष्ठवस्तुवैचित्र्यविस्मृते।
अर्के विक्षेप आश्चर्ये विकारस्वप्नयोरपि॥७॥
अयन् समस्ते सर्वेशे साधारणविशेषयोः।
आयन्नव्यथ आमं तु द्रवसारसकारसाः॥८॥
आहा वितर्के रम्भायां संरम्भे विस्मयेऽपि च।
इह प्रस्तुतभोज्यार्हवर्तमानेषु संमतम्॥९॥

Scanned with CamScanner

ईहस्संरोधसौभाग्यवैरवैचित्र(त्र्य)वाचकः।
इव्ल्लाभिप्रायसर्वज्ञबोधकारकभाजने।।१०।।
इत्थं पूर्वोक्तपूजार्हचराचरविशोभने।
आदि प्रकरणे मूल्ये पूर्तिहेतुप्रवृत्तिषु।।११।।
अति प्रकृष्ण(ष्ट)चरमप्रशंसातिक्रमादिषु।
उत प्रकारान्तरे च वितर्कप्रश्नयोरपि।।१२।।
समुच्चये समाहारे सामान्यज्ञानयोरपि।
अतश्चित्रे च हेतौ च विकारपरिणामयोः।।१३।।
अस्तु विस्तृतपीडार्घ्यासुमतीप्रसवादिषु।
इतस्समस्ते तद्भागादिषु मुख्ये च मानसे।।१४।।
कति कासारसामन्तबहुतर्कादिकेऽपि च।
विरले विशदे हेतौ मोहे मायाविकारयोः।।१५।।
कुतो वितर्के कुत्सायां प्रश्ने चित्रप्रकारयोः।
विरोधे मानसे चापि चिन्तास्वारस्यपूर्तिषु।।१६।।
कथं प्रकारे प्रश्ने च सम्भ्रमे सम्भवेऽपि च।
कमठे कठिने मूले चिन्ताविस्तारयोरपि।।१७।।
कमालस्ये च कण्ठे च शिरोऽम्बुयुगलादिषु।
किं वितर्कानुमानार्हप्रश्नस्वामिमहात्मसु।।१८।।
कच्चित्प्रश्ने कामनादिवार्तावारिधिसानुषु।
सम्भावनायां सामर्थ्ये स्वारस्यसरलादिषु।।१९।।
ततः पश्चार्धसामान्यानन्तर्ये च प्रकारके।
तावच्च पादालङ्कारे विकारप्रश्नयोरपि।।२०।।
तथा तु तत्प्रकारे स्यात्पश्चात्तापे परिग्रहे।
समीचीने मनोहारेऽप्याश्चर्ये च विमोहने।।२१।।
तस्मादिति क्वचित्कार्यकारणादौ च कथ्यते।
अन्वनुज्ञासम्यगर्थवाचालकठिनेषु च।।२२।।
पुनस्सदार्थयोस्सम्यगर्थे चापि विबोधने।
विकारे विस्मृते मोहे पर्याप्तिविशदादिषु।।२३।।
मिथोऽन्योन्ये रहस्ये च विकारप्रश्नयोरपि।
विरले विस्तृते चापि विलोलनविशालयोः।।२४।।

Scanned with CamScanner

शश्वत्समस्तप्रत्यक्षतुल्यवैचित्र्यवारिषु।
भेदानुकम्पमोहादिविस्मयामन्त्रणेषु च॥२५॥
सहैकवारे हर्षे च सम्बुद्धौ च सहार्थके।
स्वस्तिवाचनसामर्थ्यसाधारणविलोलना:॥२६॥
पश्चात्प्रतीच्यामानन्दे चरमे गेहकालयो:।
परिपाके पराधारे फालशूलादिकेऽपि च॥२७॥
सुष्ठु प्रशंसने चित्ते सौभाग्ये सरलेऽपि च।
सहवासे निवासे च साधारणविलासयो:॥२८॥
बाढं चानुमतौ दाढ्र्ये दृढे हर्षविषादयो:।
वाक्यारम्भेऽनुवाके च पूर्णविस्फुटयोरपि॥२९॥
गाढं मनोहरे फाले दृढे मुख्ये च भेषजे।
बतानुकम्पे प्रश्ने च खेदे मन्त्रे च विस्मये॥३०॥
सन्तोषे विमुखे भेदे गेहे जनपदेऽपि च।
प्रति प्रतिनिधौ मुख्ये चाभिमुख्ये मनोहरे॥३१॥
वीप्सायां लक्षणे भागे केदारे मोहनेऽपि च।
प्रीतिदाने धारणे च व्यवहारविशेषयो:॥३२॥
यथाभिमुख्यसादृश्ये योग्ये वीप्साप्रकारयो:।
वृथा निरर्थके व्याधे बोधे माधवचित्रयो:॥३३॥
नन्वु संज्ञे विलोले च पृच्छानुनयधारणे।
व्यवहारे भाषणे चानुज्ञायां च विबोधने॥३४॥
नाना बहुविकारे स्यात्साधारणसुदुष्ययो:।
मनात्(क्) स्वल्पे च निन्दायां विहारे च परिच्छदे॥३५॥
अनुमाने च पादाङ्के पालने मीलनेऽपि च।
हीने सादृश्यमूलार्थपश्चादर्थादिकेऽपि च॥३६॥
किं नु प्रश्ने वितर्के च विकारे विशदेऽपि च।
सादृश्ये सरसे सारे साधारणविशेषयो:॥३७॥
उपहीनेऽपि चारम्भेऽप्याचार्यकरणादिके।
अन्तिके वायुचलनेऽप्याचारे च तिरोहिते॥३८॥
अपि प्रश्ने च शङ्कायां पश्चाद्भागे विहायसि।
गर्हणे कामने चापि चिन्तने च समुच्चये॥३९॥

Scanned with CamScanner

अभि सर्वत्र संख्यायां समाप्तौ साधुभाषणे।
साकल्ये च विकासे च सारस्ये च सदागतौ॥४०॥
सामि त्वर्धे जुगुप्सायां विचारे हरणेऽपि च।
आन्दोलने गुरुद्रोहेऽप्यतिस्वच्छे च वस्तुनि॥४१॥
नाम प्रकाश्ये कुत्सायां सामीप्ये च तिरोहिते।
सम्भाव्येऽङ्गीकृतौ हानौ धिगर्थे मरणेऽपि च॥४२॥
किमु स्पर्शे च शाखायां भावने च परिच्छदे।
सम्भावनायां मोहे च विकल्पे चापि कथ्यते॥४३॥
कामं प्रकामे प्रश्ने चानुनये च विचारणे।
अये तु भाषणे हर्षे स्मरणे क्रोधपीडयोः॥४४॥
हन्त हर्षे च सामान्ये विक्षेपेऽपि विषादने।
वाक्यारम्भे दयायां च दाने त्यागे विहायसि॥४५॥
इत्याश्चार्ये विषादे च समाप्तौ साधनेऽपि च।
सन्तोषणे साधुवादे हेतौ विशदलोलयोः॥४६॥
गर्हा विगर्हणे चित्ते वृत्तौ बोधे च निन्दिते।
समुच्चये च शङ्कायां प्रश्नसम्भावनादिषु॥४७॥
जोषं तु तूष्णीकारे स्यात्सुखे सुखितभावयोः।
मोषं विच्छेदने रिक्ते मोहेष्वाश्चर्यलीलयोः॥४८॥
मसं तु मलिने रावे कार्ये कालप्रवासयोः।
अलं तु भूषणे पूर्णे तुष्टौ निश्चयकालयोः॥४९॥
पर्याप्तिवारणे शक्तौ कार्याकार्यविचारणे।
स्वः स्वर्गे च परे लोके समाहारे च साधने॥५०॥
किल माने च कुत्सायां वार्तासम्भाव्ययोरपि।
खलु स्यान्निलये वाक्यालङ्कारेऽनुनयेऽपि च॥५१॥
जिज्ञासायां च सामर्थ्ये निषेधे च तिरोहिते।
पुरस्त्वग्रे प्रधाने च प्रथमे च कृतेऽखिले॥५२॥
प्रध्वंसने च निन्दायां वारिदे च विदारणे।
पुरौ निबन्धने मान्ये पूर्वकाले च पूरिते॥५३॥
पूरकार्थेऽपि संमोहे पूज्यालस्यतलेषु च।
एवं पूर्वोक्तसामान्यवक्ष्यमाणप्रकारके॥५४॥

Scanned with CamScanner

प्रादुर्जन्मनि सामर्थ्ये चित्ताभोगेऽपि साधने।
प्रकाशने प्रकारे च सम्भाषणविरावयोः॥५५॥
तिरोगते विकारे च विषादेऽद्भुतहर्षयोः।
अन्तर्धाने तिर्यगर्थे पीडामोहभयेषु च॥५६॥
परिस्तु परितो रावे भावे दूषणभूषयोः।
लक्षणे लिङ्गने त्यागे परितापे च रोचने॥५७॥
आरात्तु कठिने दूरे परिहारे विशोधने।
समीपे साधुभावे च सारस्ये च तिरोहिते॥५८॥
वैशोधने परीक्षायां पारायणविरोधयोः।
पठने पठितो भावे पादपूरणमोक्षयोः॥५९॥
तु दूरे मलिने भावे कुटीरे कुक्कुटेऽपि च।
स्म स्मिते चरिते सौम्येऽप्यङ्गीकारे च गोह्वदि॥६०॥
दिवा सूर्यप्रभायां स्यादिड मासे च चन्द्रके।
पृथग्विभावने भेदे भेदिते मौनचिन्तयोः॥६१॥
कदाचिदर्थे जातु स्यादखिले परितापने।
एकवारार्चितानन्दविमलेषु च कथ्यते॥६२॥
साकं सहार्थे साकल्ये सञ्चारे चौलकर्मणि।
भृशं तु चिन्ताकुलिते चिन्तने शैत्यपैत्ययोः॥६३॥
प्रकर्षणे च प्रहरे प्रहर्षात्यर्थयोरपि।
अहोऽप्याश्चर्यकरुणाविलम्बनविषादके॥६४॥
तर्हि प्रश्ने चोत्तरार्धे विचारे च विषादने।
मुहुस्तु पुनरर्थे स्याद्गाधरावे विलोडने॥६५॥
साक्षात्तुल्ये च साकल्ये प्रत्यक्षे प्रकरेऽपि च।
मङ्क्षु शीघ्रे च सिन्दूरे पिप्पलाञ्जविलोडने॥६६॥
सत्रा सहार्थे सामर्थ्ये प्रवाहे च परिच्छदे।
मायायां बोधने पक्षे फालाक्षमणिकुण्डले॥६७॥
मुधाप्यर्थे च वैराग्ये ज्ञानेऽज्ञाने च शङ्करे।
किञ्चित्त्वल्पार्थ आनाये पेलवे चेति केचन॥६८॥
तूष्णीं मौने च बोधायां संज्ञायां साहसालयोः।
सद्यस्तत्कालसामीप्यविहारविमलेषु च॥६९॥



दिष्ट्या दैवे दैवभावे सम्प्राप्तौ पूरणेऽपि च।
मास्म हीने परित्यागे विरोधे विकलेऽपि च॥७०॥
यद्यङ्गीकारभावार्थरोहणारोहणेषु च।
दुष्टु विप्रे च पतिते मूर्खे शुनकशेफसोः॥७१॥
प्राक्पूर्वार्धे गतार्धे च प्राबल्यशलयोरपि।
मरादपि स्यात्तरले सौम्ये सौख्येऽतिभेषके॥७२॥
यदा तु जायमाने स्याद्यज्ञकर्मविरोधयोः।
यत्तु नीचेऽति चाश्चर्ये परिचारणनिन्दयोः॥७३॥
एवमन्ये तत्र तत्र प्रसिद्धा अपि केचन।
ऊह्यास्तरङ्गभावार्थमेवं प्रोक्तं मयाधुना॥७४॥

**इति श्रीमत्समस्तशब्दान्तरङ्गविद्विचित्रभाषानाथभूषणभूपालाखिल-संसेव्यमानपादारविन्दजगद्विजयप्रभावविराजितजयभट्टकविराजविरचितेऽव्ययार्णवे प्रथमस्तरङ्गः॥**

समा साधारणानुज्ञतीव्रत्वरितवाचकः।
अञ्जसानुमताचार्ये पूरके प्रकटादिके॥७५॥
प्रभावे चालने माने सुभावे भावलीलयोः।
पुरतस्तु पुरार्थे स्यात्पूर्वार्धे विजयेऽपि च॥७६॥
पूर्वतस्सर्वकार्ये स्यात्पूर्वीये प्रथमेऽपि च।
अमाहेत्यद्भुते खेदे विषादे च तिरोहिते॥७७॥
परितस्सर्वतस्तिर्यगा(ग)भिशस्तौ विलोडने।
साकल्ये सर्वतोभद्रे सामान्याखिलयोरपि॥७८॥
सर्वत्र सर्वतस्सर्वसाकल्याखिलवाचकौ।
अन्तरं तारतम्ये स्यादालापे विग्रहेऽपि च॥७९॥
अभितस्सर्वतश्चित्रे गोवृन्दे निखिलेऽपि च।
तीरे प्रवाहे मूल्ये च व्यवसायस्वरूपयोः॥८०॥
अखिलं तु समस्ते स्यात्केदारादौ विभावसौ।
दयारसे च दाक्षिण्ये निर्यासादौ च भाषणे॥८१॥
समस्तं तत्त्वसारादौ सर्वतस्सङ्गतेऽपि च।
संवादो सरसालापे ×× चाह्लादमेहयोः॥८२॥

पृष्ठतः पृष्ठभागे स्याच्चरमे पतिते मृते।
कारादौ कठिने माषे मूषके कुटिलाक्षणि॥८३॥
अभीक्ष्णमनिशे सूक्ष्मे तिर्यग्जन्तौ च भेषजे।
मुहुरर्धे(र्थे) प्रकर्षे च प्रहर्षे च सुतावपि॥८४॥
पुरस्तात्प्रथमे चो(चा)ग्रे चाग्रि दुर्वृत्तनिन्द्ययोः।
पुरार्थे पूर्वभागे च पूर्वदेशेऽपि विश्वपि॥८५॥
अन्तरं मध्यमे विघ्ने पापात्मनि कुलादिके।
वासुदेवे सुरौ चापि तिन्त्रिणीरस इष्यते॥८६॥
मालिन्ये परिभाषे च पीडने पापचिन्तने।
मौर्ख्ये मोहेऽपवादे च नारके जाल्पकेऽपि च॥८७॥
प्रसह्य तु बलात्कारे काठिन्ये मुसलायुधे।
चण्डाले भ्रष्टकृत्ये च पिल्लके कालजेऽपि च॥८८॥
साम्प्रतं प्रस्तुते साम्ये शश्वदर्थेऽपि कारणे।
कौटिल्ये व्यवहारे च कौलपत्येऽपि कथ्यते॥८९॥
यथार्थं तु यथान्याय्ये यथास्वे च यथायथे।
याताथ्र्ये यावके लोके वन्दारौ पृथुलेऽपि च॥९०॥
विधुरे कठिने नित्ये चालिन्यां मूलसाधने।
यथायोग्ये यथार्हे च यथाकल्पन इत्यपि॥९१॥
प्रत्यये तु प्रकरणे प्रारम्भे योगभोगयोः।
एकार्थे प्रतिघाते च पौले पूज्ये च भेषजे॥९२॥
अवश्यं निश्चये विन्ने मोहने प्रत्यगात्मनि।
तिर्यग्जन्तौ श्मेधसि च योनौ च मदिरागृहे॥९३॥
अथकिं तु प्रश्नभेदे निराशे निर्गते हते।
विचारे विस्मृते भागे जलजन्तौ विशोधने॥९४॥
अन्योन्यं मानुषे मायाचिन्तासङ्कल्पकारणे।
परस्परे च धारायां विचारे च परिच्छदे॥९५॥
पूर्वेद्युः पूर्वदिवसे गते दिने च चन्दने(न्द्रके)।
पातित्ये पतिते चापि मातापितृविघातने॥९६॥
परेद्युः परवारे स्यात्परे च परमात्मनि।
मृत्युञ्जये च विकटे विराधे मलिनायसोः॥९७॥



परश्वस्तु पराराधे पादार्हे च परेऽहनि।
परश्वथे च पशुके विशाले दोषसम्भृते॥९८॥
तदानीं तु तदा काले तत्काले तादृशेऽपि च।
पौलपत्ये च पाषण्डे पाण्डित्येऽपि च पायसे॥९९॥
इदानीं प्रस्तुते मूल्ये दधित्ये रामणीयके।
हङ्कृतौ हास्यबीभत्सविहारासारपूर्तिषु॥१००॥
युगपत् पृथुले चैकदा सर्वाखिलबोधिषु।
साकल्ये मलिने शीते श्वेते च मरुभूमिषु॥१०१।
अधुना वर्तमानार्थे विचारशरदभ्रयोः।
विहारे प्रकृते लीने प्रकृतार्थे विचारणे॥१०२॥
साम्प्रतं प्रस्तुते मूले ध्वनौ माहिष्यवासयोः।
सरसे विरसे वीर्ये स्वभावे कल्पने चले॥१०३॥
अन्ततस्सरलार्थे स्यादधुनार्थे विशोधने।
अधे युक्तार्थ आनायेऽखिले चैत्ये च पूलने॥१०४॥
उपांशु तु रहस्ये स्याद्विश्राणनविशालयोः।
विलोकने च सामर्थ्ये विभावादिमनोज्ञयोः॥१०५॥

इति **श्रीमत्समस्तशब्दान्तरङ्गविद्विचित्रभाषानाथभूषणभूपालाखिल-संसेव्यमान पादारविन्दजगद्विजयप्रभावविराजितजयभट्टकविराजविरचिते-ऽव्ययार्णवे द्वितीयस्तरङ्गः॥**

समन्ततस्सर्वतोऽर्थे स्वाभावेऽपि दलेऽपि च।
सैन्यविन्यासभेदे स्यात्सामर्थ्ये लोकसंमते॥१०६॥
अन्तरेणेति शब्दस्तु साकल्ये शमलाम्भसोः।
मध्ये च मरणे भेदे निन्दायां क्रुधि च प्रिये॥१०७॥
किल धानु मरुप्रायभूमीशान्तफलादिषु।
शबकानं तु शाम्बर्यां शबले शाबरेऽपि च॥१०८॥
यथायथं यथान्याय्ये यथास्वे च यथोचिते।
यथोचितं यथायोग्ये मुख्ये माङ्गल्यदम्भयोः॥१०९॥
यथातथं यथार्थे स्यादाचारे संमते मरौ।
मरणे धर्मशास्त्रे च न्याय्ये मोक्षे प्रयोजने॥११०॥

Scanned with CamScanner

चिकित्सायां च शान्तौ च देवे दैव्ये च दारुणे।
वैद्ये वारुणमन्त्रादौ वासिष्ठे वयसीकृते।।१११।।
यथान्याय्यं यथान्याये यथार्हे काममोक्षयोः।
यथार्थे याजके राज्ञभ्रष्टौ क्षेमे च मारके।।११२।।
अनन्तरं तु शेषार्थे चिकित्सायां विशोधने।
वमने वारिजानन्दे वातापिश्चेल्वलोऽपि च।।११३।।
परम्परा तु सान्तत्येऽप्यनूचारे चिदात्मनि।
पारमार्थिकमानुष्यमोहदारकवारिषु।।११४।।
उपर्युपरि चित्ताभोगे च पाषण्डभूभृतौ।
सर्वो दुर्गे च सन्ताने सन्तापे विकृतावपि।।११५।।
परीतकं महासत्त्वे पारमार्थिकशाल्ययोः।
मौने मायाविकारादिपूजादिमलिनादिके।।११६।।
वसधारं मनोज्ञे स्याद्विचित्रे वैद्यशास्त्रयोः।
कान्तिचौर्यपरीणाममहारजतकाञ्चनम्।।११७।।
चक्कडारं महासत्त्वे सौख्ये साध्ये च भूषणे।
मालिन्ये च मनोज्ञे च विहाररणयोरपि।।११८।।
मतिकारं महाशापे कोपे चापि च तादृशे।
चिक्कणे चापि शार्दूले विलोले रणमूर्धनि।।११९।।
साधकन्दं विहारे स्याद्भ्रष्टकृत्ये च वारिणि।
चूडाकर्मणि चौले च साम्राये च सदागतौ।।१२०।।
चर्वीकृतं तु सापित्ये सार्वज्ञ्ये चर्मणि स्मृतम्।
चर्मकारे क्वचिज्ज्ञेयं शारीरमलकिट्टयोः।।१२१।।
उञ्चवालं विशरणे पारिजाते च पादपे।
मत्स्याक्ष्यां मौसले चित्ते ×× चाति क्वचित्स्मृतम्।।१२२।।
गढखट्टं विलोके स्यात्सान्तत्ये संवृतावपि।
गामानयेति संज्ञायां गाने गङ्गासरिज्जले।।१२३।।
शतबाडं तु शाकुन्ते चातुर्ये शङ्करेऽप्यहौ।
वाचालेऽपि च वाचाटे कुत्सिते पापचिन्तके।।१२४।।

**इति श्रीमत्समस्तशद्वान्तरङ्गविद्विचित्रभाषानाथभूषणभूपालाखिल-संसेव्यमान पादारविन्दजगद्विजयप्रभावविराजितजयभट्टकविराजविरचिते-ऽव्ययार्णवे तृतीयस्तरङ्गः समाप्तः।।**

Scanned with CamScanner